# Shri Sabhanatha Pancharatna Stotram

# શ્રીસભાનાથ પઞ્ચરત્નસ્તોત્રમ્

## Document Information

Text title : Sabhanatha Pancharatna Stotram

File name : sabhAnAthapancharatnastotram.itx

Category : shiva, pancharatna, stotra

Location : doc_shiva

Author : Copyright : Raghava Deekshithar N sivathmika.puliyur at gmail.com

Transliterated by : Raghava Deekshithar N

Proofread by : Raghava Deekshithar N

Latest update : August 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 2, 2025

*sanskritdocuments.org*

# Shri Sabhanatha Pancharatna Stotram

# શ્રીસભાનાથ પઞ્ચરત્નસ્તોત્રમ્

વન્દે ચન્દ્રકલાધરં મૃગધરં વન્દે જગત્પાલકં
વન્દે કુઞ્ચિતપાદમીશમનિશં વન્દે પુરદ્વેષિણમ્ ।
વન્દે હેમસભાપતિં નટપતિં વન્દે કૃપામ્ભોનિધિં
વન્દેઽહં શિવકામિનીસહચરં વન્દે સભાનાયકમ્ ॥ ૧॥

વન્દે ચન્દ્રદિનેશવહ્નિનયનં વન્દેઽતિસૌમ્યાકૃતિં
વન્દે નિર્મલમપ્રમેયમતુલં વન્દે શિવં શૂલિનમ્ ।
વન્દે પર્વતપુત્રિકાર્દ્ધવપુષં વન્દે સુમન્દસ્મિતં
વન્દેઽહં શિવકામિનીસહચરં વન્દે સભાનાયકમ્ ॥ ૨॥

વન્દે ભસ્મવિભૂષિતં ભયહરં વન્દેઽહમાનન્દદં
વન્દે શૈવસુમન્ત્રરાજનિલયં વન્દે ગુરૂણાં ગુરુમ્ ।
વન્દે ષણ્મુખવિઘ્નરાજજનકં વન્દે પરં વ્યોમગં
વન્દેઽહં શિવકામિનીસહચરં વન્દે સભાનાયકમ્ ॥ ૩॥

વન્દે ભૂતગણાધિપં શશિનિભં વન્દે પશૂનાં પતિં
વન્દે ભક્તસુરદ્રુમં ચ વરદં વન્દે મુરારીડિતમ્ ।
વન્દે તિલ્લવનેશ્વરં શિવકરં વન્દે ભવોત્તારકં
વન્દેઽહં શિવકામિનીસહચરં વન્દે સભાનાયકમ્ ॥ ૪॥

વન્દે પાશવિમોચકં સ્મરહરં વન્દે યમસ્યાન્તકં
વન્દે દિવ્યમહોક્ષગં ગુણનિધિં વન્દે મખાધીશ્વરમ્ ।
વન્દે તં નિગમાગમૈરભિનુતં વન્દે મૃડં શઙ્કરમ્
વન્દેઽહં શિવકામિનીસહચરં વન્દે સભાનાયકમ્ ॥ ૫॥

ઇતિ શ્રીસભાનાથ પઞ્ચરત્નસ્તોત્રં સમ્પૂર્ણમ્ ।

Composed, encoded, and proofread by
(Copyright) Raghava Deekshithar N sivathmika.puliyur at gmail.com

*Shri Sabhanatha Pancharatna Stotram*

pdf was typeset on August 2, 2025

Please send corrections to *sanskrit@cheerful.com*